# Atrikrita Shivacharanavandana

# અત્રિકૃતા શિવચરણવન્દના

## Document Information

Text title : Atrikrita Shivacharanavandana

File name : shivacharaNavandanatrikRRitA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 85-96||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

*sanskritdocuments.org*

# અત્રિકૃતા શિવચરણવન્દના

પાવિતોઽસ્મિ મહાદેવ પ્રસન્નોઽસિ યતો મમ ।
ઇતોઽપ્યભીષ્ટમન્યન્મે કિમસ્તિ કરુણાનિધે ॥ ૮૫॥

યદ્વિષ્ણુનેત્રભ્રમરાલીઢં તે પદપઙ્કજમ્ ।
મયા દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૮૬॥

યત્સિદ્ધહૃત્પઙ્કજગં તવ પાદાબ્જમુત્તમમ્ ।
મયા દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૮૭॥

યદ્ધ્યાતં યોગિવર્યસ્તે પાદમગ્નમભીષ્ટદમ્ ।
મયા દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૮૮॥

વિષ્ણુનેત્રાર્ચિતં યત્તે પદદ્વન્દ્વમનુત્તમમ્ ।
મયા દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૮૯॥

યત્તે શ્રુતિશિરોરત્નં ચરણદ્વન્દ્વમુત્તમમ્ ।
મયા દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૯૦॥

યન્મૌનિમાનસસરોહંસભૂતં પદામ્બુજમ્ ।
મયા દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૯૧॥

યદનાયાસેન મોક્ષાય કલ્પતે પદપઙ્કજમ્ ।
તત્તે દૃષ્ટં મહાદેવ કિમભીષ્ટમતઃ પરમ્ ॥ ૯૨॥

પૂર્ણા મનોરથાઃ સર્વે યણ્પદદ્વન્દ્વન્દ્વન્દર્શનાત્ ।
તત્તે દૃષ્ટં મહાદેવં કિમ્મભીષ્ટમતઃ પરમ્ ॥ ૯૩॥

ધન્યં મમ કુલં જાતં યત્પદદ્વન્દ્વદર્શનાત્ ।
કૃતાર્થોઽસ્મિ કૃતાર્થોઽસ્મિ મહાદેવ કૃપાનિધે ॥ ૯૪॥

મચ્ચિત્તભ્રમરો નિત્યમસ્મિંસ્ત્વત્પદપઙ્કજે ।
યથા તિષ્ઠતિ દેવેશ તથા કુરુ મહેશ્વર ॥ ૯૫॥

અસ્ય દેહસ્યાવસાને મોક્ષપાત્રં કુરુષ્વ મામ્ ।
ન ત્વદન્યો મોક્ષહેતુરિતિ વેદા વદન્તિ યત્ ॥ ૯૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે અત્રિકૃતા શિવચરણવન્દના સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૪ । ૮૫-૯૬॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 85-96 ..

Notes:
Ṛṣi Atri ઋષિ અત્રિ expresses the gratification that he is experiencing at having witnessed the Presence of Śiva શિવ and pays obeisance to His Feet - Caraṇadvandva ચરણદ્વન્દ્વ Ṛṣi Atri ઋષિ અત્રિ then beseeches Śiva શિવ to bestow upon him the Liberation i.e. Mokṣa મોક્ષ when he leaves his mortal coil.

Encoded and proofread by Ruma Dewan

*Atrikrita Shivacharanavandana*
pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*